गुप्तसाधनतंत्रम्

नं॰ १०७६

161

नं० १०६३—क

[illegible]

१४ पत्राणि

[illegible]

55 40

F — 14

Complete

पुत्रसाधनं

गुप्त॰ सा॰ तं॰ १

ॐ नमो दुर्गायै कैलासशिखरे रम्ये नानारत्नोपशोभिते तं क
दाचित्सुखासीनं भगवंतं त्रिलोचनं पप्रच्छ परया भक्त्या देवी लो
कहिते रता श्रीदेव्युवाच देवदेव महादेव लोकानुग्रहकारक कु
लाचारस्य माहात्म्यं पुरैव सूचितं तथा तत्कथं गोपितं देव मम प्रा
णेश्वर प्रभो कथयस्व महाभाग यद्यहं तव वल्लभा श्रीशिव उवाच
शृणु देवि प्रवक्ष्यामि सारात्सारं परात्परं तव स्नेहान्महादेवि यदा
सोस्मि तव सुंदरि तत्कथां कथयिष्यामि सावधानावधारय कुला
चारं महाज्ञानं गोप्तव्यं पशुसंकटे अगोप्तव्यं महादेवि स्वयोनिरि
व पार्वति वेदागमपुराणानि वेदशास्त्राणि पार्वति एतन्मध्ये सा
रभूतं कुलाचारस्य दुर्लभं वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैर
पि कुलाचारस्य माहात्म्यं वर्णितुं नैव शक्यते किंचिन्मया तव चा
पल्यात्कथयामि शृणुष्व मे शक्तिमूलं जगत्सर्वं शक्तिमूलं परंतपः
शक्तिमाश्रित्य निवसेद्गृहाश्रममेव सन् साधकस्यापि तां श
क्तिः साधकज्ञानकारिणी इहलोके सुखं भुक्त्वा देवीदेहे प्रलीय
ते साधकेंद्रो महासिद्धिं लब्ध्वा याति हरेः पदं पंचाचारेण देवेशि
कुलशक्तिं प्रपूजयेत् नटी कापालिकी वेश्या रजकी नापितांगना
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका मालाकारस्य कन्या च
नव कन्याः प्रकीर्तिताः विशेषवैदग्ध्ययुताः सर्वा एव कुलांगनाः

रूपयौवनसंपन्नाशीलसौभाग्यशालिनी पूजनीयाप्रयत्नेनततः
सिद्धिर्भवेद्ध्रुवं सत्यंसत्यंमहादेविसत्यंसत्यंनसंशयः इतिश्रीगु
प्तसाधनतंत्रेपार्वतीशिवसंवादेप्रथमःपटलः १ श्रीपार्वत्युवा
च वाधतेमांकृपानाथगुरुशब्दंविभुत्सहे स्त्रियःस्वभावचपलान
शक्नोहंपुनःपुनः यदुक्तंकृपयानाथरहस्यंपरमाद्भुतं गुरुर्ब्रह्मा
गुरुर्विष्णुर्गुरुर्देवोगुरुर्गतिः गुरुस्तीर्थंगुरुर्यज्ञोगुरुर्दानंगुरुस्त
पः गुरुरग्निर्गुरुःसूर्यःसर्वंगुरुमयंजगत् किमनेनकिंतपसाकि
ममतीर्थसेवया श्रीगुरोरर्चितोयेनपादौतेनार्चितंजगत् ब्रह्माण्ड
भाण्डमध्येतुयानितीर्थानिसंतिवै गुरोःपादोदकेतानिनिवसंति
हिसंततं गुरोःपादोदकंयेनशिरसाधारणंभवेत् सर्वतीर्थज
लंपुण्यंलभतेनात्रसंशयः इतितस्यगुरोर्ध्यानंतत्वतःश्रोतुमुत्स
हे लब्धंतद्देहेदेहींमांकथयस्वदयानिधेप्रभो मयिस्नेहात्त्वंयोस्ति
यदितन्मेप्रकाशय श्रीशंकरउवाच नवंवयामिदेवित्वांप्राणे।
भ्योपिगरीयसी स्त्रीणांस्वभावचापल्याद्गोपितंनप्रकाशितं
कथयामितवस्नेहाच्छ्रीगुरोर्ध्यानमुत्तमं प्रकाशंचकुलीनेषु
नप्रकाशंपशौक्वचित् कुलःशक्तिःसमाख्याताअकुलःशिव
उच्यते तत्संलीनोभवेद्यस्तुसकुलीनःप्रकीर्तितः कुलवृक्षानम
स्कृत्यगुरुंध्यायेत्सरोरुजे शारच्चंद्रसमाभासंशरत्पंकजलोचनं

ईषद्धास्यस्फारदीपश्रीगुरुं सहस्रशानन्दं दिव्यस्रग्वरधरं दिव्यगंधा
नुलेपनं स्वरक्तशक्तिसंयुक्तवामभागमनोहरं वराभयकरांभो
जं सर्वलक्षणलक्षितं सहस्रारे महापद्मे गुरुं शिरसि चिंतयेत् प
ननेकथितं देवि श्रीगुरोर्ध्यानमुत्तमं गोपनीयं प्रयत्नेन न प्रका
श्यं कदाचन इति ते कथितं सर्वं तव स्नेहेन सुंदरि किमन्यत्संप्रव
क्ष्यामि कथयस्व शुचिस्मिते श्रीपार्वत्युवाच गुरोर्ध्यानं श्रुतं नाथ
सर्वतंत्रेषु गोपितं स्त्रियादीनां शुभा प्रोक्ता सर्वकामफलप्रदा
बहुजन्मार्जितात्पुण्याद्दृढभाग्यवशाद्यदि स्त्रीगुरुर्लभ्यते नाथ
तस्य ध्यानं तु कीदृशं कुलीनस्त्रीगुरोर्ध्यानं श्रोतुमिच्छामि सांप्रतं
कथयस्व महाभाग यद्यहं तव वल्लभा श्रीशंकर उवाच शृणु पा
र्वति वक्ष्यामि तव स्नेहपरिप्लुता रहस्यं स्त्रीगुरोर्ध्यानं यत्र येयाव
सान्गुरुः सहस्रारे महापद्मे किंजल्कगणशोभिते प्रफुल्लपद्मप
त्राक्षीं घनपीनपयोधरां सहस्रवदनां निम्नां क्षीणमध्यां शिवां
शुभे पद्मरागसमाभासां रक्तवस्त्रसुशोभनां रत्नकंकणपाणिं
च रत्ननूपुरशोभितां शरदिंदुप्रतीकाशवक्त्रोद्भासितकुंडलां
स्वनाथवामभागस्थां वराभयकरांबुजां इति ते कथितं देवि स्त्रीगु
रोर्ध्यानमुत्तमं गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन इति श्रीगु
रुसाधनतंत्रे पार्वतीशिवसंवादे द्वितीयः पटलः २ श्रीपार्वत्युवा

व देवदेव महादेव भक्तानां मुक्तिदायक तवप्रसादात्प्राणे
शश्रुतं साधनमुत्तमं पंचांगोपासनं देवरहस्यादि शक्तियां
तत्सर्वं ब्रूहि मे देव यदि स्नेहोस्ति मां प्रति ईश्वर उवाच दिवा
रात्रिप्रभेदेन जपेन्मंत्रमनन्यधीः स्नानादिकं जपेन्नैव ग्रहणे
नास्ति पार्वति पंचाचारेण देवेशि सर्वकार्यं जपादिकं स्व
च्छाचारोत्र गदितो महामंत्रस्य साधने प्रसहं परमेशानि प
क्वैकं विप्रभोजनं प्रातःकालं समारभ्य जपेन्मध्यं दिनावधि
पूजां कृत्वा साधकेन्द्रः पुनर्जपनमाचरेत् सायं संध्यां ततः कृ
त्वा भोजनं स्वेच्छया नयेत् भक्तं त्वाम्बूलमत्स्यांश्च भक्ष्यद्रव्यान्य
थारुचिः भुंजानो बहुविधांश्च शाकं पायसमेव च एवं कृ
त्वा साधकेन्द्रो रात्रौ जपनमाचरेत् गते तु प्रथमे यामे तृतीये प्र
हरावधि स्ववामे शक्तिं संस्थाप्य जपेन्मंत्रमनन्यधीः शक्तिपू
जो भवेन्मर्त्यः सिद्धो भवति नान्यथा कुलशक्तिं विना देवि यो
जपेत्तत्त्वपामरः सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि पु
नश्च विप्रवेत्सैव पूजयेद्धिमवावधि कुमारीं पूजयित्वा तु भोज
येद्विधिपूर्वकं शतमष्टोत्तरं चैव ब्राह्मणान्भोजयेत्ततः शा
किपूजां ततः कृत्वा भोजयेच्च यथाविधि गुरवे दक्षिणां दद्या
त्स्वर्णवस्त्रसमन्वितं यद्यदिष्टतमं लोके गुरवे तन्निवेदयेत्

गु
प्तसा.
तं.
६

गुरुसंतोषमात्रेण किं न सिध्यति भूतले गुरुरेव परं ब्रह्म ना
स्ति तत्त्वं गुरोः परं एवं कृते मंत्रसिद्धिर्भवत्येव न संशयः सर्व
सिद्धीश्वरो भूत्वा विचरेद्भैरवो यथा सयन्तः सत्यविज्ञानी शिव
तुल्यो न संशयः इति श्रीगुप्तसाधनतंत्रे पार्वतीश्वरसंवादे द्वि
तीयः पटलः २ श्रीपार्वत्युवाच देवदेव महादेव संसारार्ण
वतारक अतिशीघ्रफलं देव केनोपायेन लभ्यते श्रीशिव उ
वाच शृणु पार्वति वक्ष्यामि अतिगुप्ततरं महत् प्रकाशात्सि
द्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत् स्वशक्तिं परशक्तिं वा दी
क्षितां यौवनान्वितां विदग्धां शोभनां श्यामां घृणालज्जाविवर्जि
तां नामानीय साधकेंद्रो दद्यात्साद्यादिकं शुभं पंचाचारेण तां श
क्तिं संपूज्य विधानतः यथाविधि शतं शीर्षे शतं भाले शतं सिंदूरमंडले
शतं मुखे शतं कंठे शतं हृदयमंडले शतं स्तनद्वंद्वे शतं
नाभौ जपेत्सुधीः योनिपीठे शतं जप्त्वा साधकः स्थिरमानसः
एवं सहस्रसंजप्य देवीं तत्र विचिंतयेत् स्वयं शिवस्वरूपश्च चिं
तयेत्साधकोत्तमः शिवमंत्रेण देवेशि स्वलिंगं पूजयेदथ तां
बूलं तन्मुखे दत्त्वा साधको हृष्टमानसः नरद्रव्यं समादाय यो
नौ लिंगं विनिक्षिपेत् धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहेत्यनेन मंत्रेण कु

मेन्त्वं समहृदये ततोजपेन्महस्त्रं वैशाक्तिमुक्तोभवेन्नरः शांतंवा
पित्रजमंत्रंततोन्यूनं नकारयेत् हर्णाकृतिंततोदद्यान्मंत्रेणाने
नसाधकः प्रकाशाकाशमंत्राभ्यामेवलत्तोम्मणीस्कवा धर्माध
मेकलास्वेहर्णामग्रीजहोमयं स्वाहेत्यनेनमंत्रेणहर्णाकृतिं
समावेत् शुक्रोत्सारणकालेवदेव्यैशुक्रं समर्पयेत् एवंकृतेमं
त्रसिद्धिर्नात्रकार्याविचारणा यंयंप्रार्थयतेकामंतंतंप्राप्नोति
निश्चितं रोगीरोगात्प्रमुच्येत धनेनचधनाधिपः वायुतुल्यबलो
लोकेदुर्जयःशत्रुमर्दनः कामतुल्यश्चनारीणांविशेषणांशमनोप
मः एतत्कलेनदेवेशिकिंनसिध्यतिभूतले अष्टैश्वर्यमवाप्नो
तिसएवश्रीसदाशिवः इतिश्रीरसायनतंत्रेपार्वतीश्वरसंवा
देचतुर्थःपटलः ४ श्रीपार्वत्युवाच हेईश्वरजगन्नाथमम
प्राणेश्वरप्रभो इदानींश्रोतुमिच्छामिमासाधिकपुरस्क्रियां
श्रीशिवउवाच एकमासेनषट्लक्षंद्विमासेरविलक्षकं मास
त्रयेतुदेवेशिरसयुग्मकलक्षकं चतुर्मासेसहस्राणिचतुर्वि
शतिलक्षकं पंचमासेसहस्राणित्रिंशल्लक्षंसदाजपेत् षण्मा
सेप्रजपेन्मंत्रंषट्त्रिंशल्लक्षकंसदा सप्तमासेसहस्राणिद्विचत्व
ल्लक्षकंसुधीः अष्टमासेसहस्राणिगजवेदश्चलक्षकं मासेनव
वमेदेविवेदबाणश्चलक्षकं दशमासेतुसंप्राप्तेषष्टिलक्षंचसं

गु
म.सा.
तं.
४

जपेत् मासेवैकादशेप्राप्तेलक्षंकालरसंजपेत् वर्षद्वयंमहेशानि
शतलक्षंजपेत्सुधीः अनेनैवविधानेनयोजपेत्कुविमानसः केव
लेनजपमात्रेणमंत्रःसिद्धिर्भवतिहि पंचाचारेणदेवेशिसर्वका
र्यंजपादिकं एवंवक्त्रकिरणांवक्त्रमार्गीचैवसजयेत् तथाश
क्तिश्रीसर्वाणांवभोजयेद्विधिपूर्वकं तथातेनप्रकारेणशक्तिभोज
नमाचरेत् शक्तिंविनामहेशानिसदाहंशवरूपकः शक्तियुक्तो
यदादेविशिवोहंसर्वकामदः शक्तियुक्तोजपेन्मंत्रंनमंत्रंकेवलं
जपेत् सावित्रीसहितोब्रह्मासिद्धिनगनेदिनि द्वारावत्यांकृष्णदे
वःसिद्धोभूत्सत्ययासह यथागोपवधूसंगात्ममसिद्धिर्वरानने
सशिवोहंमहादेविकेवलेशक्तियोगतः शक्तियोगेनदेवेशि
यदिसिद्धिर्नजायते तदैवपरमेशानिममवाक्यंवृथाभवेत्
गंगाकाशीप्रयागादौपुष्करेनैमिषंतथा वदरीचतथारेवाउ
कलेगंडकीतथा सिंधुःसरस्वतीचैवपीठानिविविधानिच
सर्वत्रकामहेशानिस्त्रीसंगयत्नतश्चरेत् स्त्रीसंगेसिद्धिमाप्नो
तिममवाक्यंनचान्यथा यद्दत्तंजलगंडूषंशक्तिवक्त्रेस्वरेश्वरि
सिंधुरूपंपरेशानितज्जलंनात्रसंशयः अमंत्रशैलतनयेस्थला
वलसमंभवेत् एवंसत्यानसर्वत्रतातथाजलसाधकैः सदे
हदेवीभावेनभोजयेन्नाचयत्नतः क्रोधान्मोहात्कुलाद्वापियदि

स्त्रां न कारयेत् कल्पकोटिशतेनापि तस्य सिद्धिर्न जायते एत।
त्सिद्धितं मं देवि तव स्नेहात्प्रकाशितं नव कस्यापि शोर्ग्गेशय यो मे
त्वयि प्रिये इति श्रीगुप्तसाधनतंत्रे पार्वतीशिवसंवादे पंचमः पट।
लः ५ श्रीदेव्युवाच शिवशंकर ईशान ब्रह्मिमे परमेश्वर दक्षिणा
याः प्रकारं तत्सूचितं न प्रकाशितं इदानीं श्रोतुमिच्छामि यदि ते स्ति
कृपानिधि दक्षिणा सिद्धिदा सिद्धा त्रैलोक्ये ऽपि सुदुर्लभा यामाराध्य
महादेव सृष्टिकर्ता प्रजापतिः यामाराध्य महाविष्णुः पालयत्यखि
लं जगत् संहारकाले च हरो रुद्रमूर्तिधरः परः तां विद्यां वद ईशान
यद्यहं तव वल्लभा श्रीशिव उवाच दक्षिणायाः प्रकारं तत् कालीतं
त्रादियामले श्रुतः परमेशानि विरता भवसुंदरि श्रीपार्वत्युवाच
एतत्प्रकारं देवेश यदि ते न प्रकाशितं प्राणत्यागं करिष्यामि सुव
त सत्यं न संशयः श्रीशिव उवाच शृणु देवि प्रवक्ष्यामि दक्षिणां क
लपसुत्तमं यस्याः प्रसंगमात्रेण भवाब्धौ न निमज्जति स्वरांतं वह्निसं
युक्तं वामनेत्रविभूषितं बिंदुनादकलायुक्तं मंत्रं त्रैलोक्यमोहनं
भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक्छंद उदाहृतं दक्षिणा कालिका प्रोक्ता
देवता सर्वसिद्धिदा मायाबीजं बीजमस्याः कूर्चबीजं तु शक्तिकं
निजबीजं महेशानि कीलकं सर्वमोहनं धर्मार्थकाममोक्षेषु वि
नियोगः प्रकीर्तितः कालीतंत्रादितंत्रेषु पूजायागादि पार्वति लि

गु॰
मसा॰
तं॰
५

एवं तं च मया सर्वं किमन्यच्छ्रोतुमिच्छसि श्रीदेव्युवाच ध्यानात्तु
रूपिणी मूर्तिं यदि पूजादिकं चरेत् आचारं कीदृशं तत्र को वा मंत्र
प्रपूजयेत् भूतशुद्ध्यां महादेव यदि देहं तु नाशयेत् कुत्र स्थले भवे
दृष्टि भूतं कुत्र संचरेत् आलोच्य कीदृशं नाथ प्रमालीकं तु कीदृ
शं कथं वा कालिका देवि श्मशानालयवासिनी निशा वा कीदृ
शी नाथ कीदृशी वा महानिशा भावभेदे महादेव तद्वदस्व दया
निधे श्रीशिव उवाच शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि
तत्तत्सर्वं प्रवक्ष्यामि सावधानावधारय पूजायाः पूर्वदिवसे आ
दौ तैलादिकं चरेत् हविष्यान्नभोजनं च अथवापि निशामिषं तत ः
परस्मिन्दिवसे प्रातःस्नात्वा तु साधकः नित्यपूजां समाप्यादौ देव
वत्कृत्यमानसः गुरुर्वा गुरुपुत्रो वा गुरुपत्नी च सन्निधाने आगमोक्त
विधानेन अधिकारी गुरुः स्वयं गुरोरभावे देवेशि स्वयं पूजादिकं
चरेत् एभिर्विना महेशानि गुरुः कर्ता विधीयते ब्रह्मरूपो गुरुः सा
क्षाद्यदि पूजादिकं चरेत् तत्तत्सर्वं महेशानि शतकोटिगुणं भवेत्
अथवा परमेशानि स्वयं पूजादिकं चरेत् स्वयं पूजादिकं कृत्वा पू
जाद्रव्यादिकं च यत् तत्सर्वं परमेशानि गुरोरग्रे निवेदयेत् गुरो
र्दत्ते महेशानि सर्वं कोटिगुणं भवेत् गुरुपत्नी महेशानि यदि
पूजादिकं चरेत् बलिदानादिकं सर्वं तत्र मोहं विवर्जयेत् होमीय

द्रव्यमानीय देवि संस्थापयेद्बुधः तत्र मूलं समुच्चार्य महादेव्यै
निवेदयेत् तेन होमफलं जातं न वाग्नौ होमयेद्बुधः गृहं विलं
श्मशाने स्मिन्नायिकारीस्तैरपि गृहणाय त्वत्कृते देवि तत्सर्वम
क्षयं भवेत् स्त्रीक्रूरादयो देवि समस्ता मावहवः प्रिये तन्त्रोक्ते
परमेशानि नाम्न हृङ्गं विलोकयेत् इह पूजादिकं सर्वं यः कुर्या
ज्जनसन्निधौ तस्य सर्वार्थहानिः स्यात्क्रुद्धा भवति चण्डिका वरेपू
जा न कर्त्तव्या न कुर्याज्जनसन्निधौ असन्निहिते देवि यदि पूजा
परो भवेत् विलम्बं तत्रोक्तपूजादि तत्तन्मुद्रां प्रदर्शयेत् तेन पूजा
दिकं जातं न च व्यर्थं कदाचन वामकक्षे स्थितं पापं पुरुषं कज्ज
लप्रभं तस्य संहारणार्थाय महती प्रकटीकृता लिङ्गदेहा महे
शानि तस्य देहो न संशयः पापदेहं भवेद्गुह्यं स्वदेहं नैव नाश
येत् आलीढं वामपादं तु प्रत्यालीढं तु दक्षिणं संहाररूपिणी
काली जगन्मोहनकारिणी वह्निरूपा महामाया सत्यं सत्यं न
संशयः अत एव महेशानि श्मशानालयवासिनी आलीढ
पादा सा देवी प्रत्यालीढा तु दक्षिणे अनन्तरूपिणी श्यामा
की वक्त्रे शक्तिते प्रिये अनन्तरूपिणी श्यामा चतुर्वर्गफलप्रदा
गृहणाय स्य यत्प्रोक्तं तत्तस्य ब्रह्मसंहितं निशान्तं परमेशानि सू
र्यवास्तमुपागते प्रहरे गते रात्रौ द्वारिके द्वयपरे वये महानिशा
व

उ
प्रसा·
तं·
६

समाख्यानातत्स्थातिमहानिशा अर्द्धरात्रेगतेदेविपशुभावेनप्र
जयेत् दशादंडेनयाप्रजातत्सर्वमक्षयंभवेत् अष्टक्रोशेमहेशा
नितत्सर्वममृतोपमं सप्तमक्रोशकेदेवि सर्वंतीर्थसमंभवेत्
अष्टमक्रोशकेदेवि इच्छातत्सिद्धिसंशयः पतत्सर्वंमहेशानिपशु
भावेमयोदितं दीक्षावीरमतेदेवितत्त्वस्नानीप्रपूजयेत् पंचतत्त्व
समानीययदिपूजापरोभवेत् कालाकालंमहेशानिविचारंत
त्ववर्जयेत् अर्द्धरात्रेगतेदेवि फलपूजाप्रकीर्तिता तत्त्वसंशादिरू
पेण सर्वंस्नानादिकंचरेत् अतिस्नेहेनदेवेशितवस्थानेप्रकाशि
तं पशोरग्रेप्रकाशंवैकदाचिन्नैवकारयेत् इति श्रीगमसायन
तंत्रेपार्वतीशिवसंवादेसप्तमःपटलः ७ श्रीदेव्युवाच भूतना
थजगन्नाथजगत्त्रिस्तारकारक त्वांविनासंशयच्छेत्तानहिश्रा
तावकस्त्रवित् इहिमेजगतांनाथतत्त्वंपरमदुर्लभं येनतत्त्वा
नप्रसादेननिर्वाणपदमीयते कथ्यतांपरमेशानयदिस्नेहो
स्तिमांप्रति तवस्नेहान्महादेवपंडितोहंनचान्यथा श्रीशिव
उवाच त्रैलोक्यवात्सलःख्यातोवात्सल्यीहंसुरेश्वरि वात्सल्यव
वः श्रुत्वाप्रतीतात्वंकथंप्रिये तमेवपरमंतत्त्वंकिमन्यच्छ्रोतु।
मिच्छसि अतःपरंमहेशानिविस्तानवसुंदरि श्रीदेव्युवाच य
दितत्त्वंमहादेवनमेकथयसिप्रभो प्राणत्यागंकरिष्यामिश्रु

तत्तेन संशयः श्रीशिव उवाच सर्वतंत्रेषु देवेशि कथितं च
मया पुरा अत्र रूपेण देवेशि कथं पृच्छ पुनः पुनः तव स्नेहान्म
हादेवि किं मया न प्रकाशितं इमां कथां महादेवि व्यक्तरूपे च।
मा वद श्रीदेव्युवाच तथैव पुरतः स्थित्वा यदुक्तं च मया पुरा त।
हावं परमेशानि कथं मिथ्या भविष्यति श्रीशिव उवाच शृणु
देवि प्रवक्ष्यामि तत्त्वं परमदुर्लभं मंत्रोद्धारक्रमेणैव तत्सर्वं क
थयामि ते भांतमाकारसंयुक्तं खांतं वायुयुतं ऊरु बिंदुयुक्तं
पुनर्भांतमाकारं बिंदुसंयुतं चंद्रबीजं समुच्चार्य प्रकारं तद
नंतरं पुनर्भांतं महेशानि सूर्यस्वरविभूषितं नांतं पुकारसंयु
क्तं थांतमाकारसंयुतं खांतं वह्निसमारूढं माकारसंयुतं ऊरु
पुनर्भांतं महेशानि सूर्यस्वरविभूषितं नांतं पुकारसंयुक्तं थांत
माकारसंयुतं पंचतत्त्वमिदं देवि सर्वतंत्रेषु गोपितं यदि विश्रो
भवेद्देवि पंचतत्त्वपरायणः सत्यं सत्यं महेशानि परतत्त्वे प्रली
यते यथा जलं तोयमध्ये लीयते परमेश्वरि तथैव तत्त्वसेवायां
लीयते परमात्मनि तत्प्रियः परमेशानि सहयोगे वसेद्ध्रुवं वै
ष्णवत्वं लभते देवि सत्यं सत्यं न संशयः अहं त्वं परमेशानि सह
लोके सदा वसेत् एतदंशो महेशानि यदि तत्त्वपरायणः सत्यं
सत्यं महेशानि मुक्तिफलमवेडितं सेनानी परमेशानि देवी।

गु. स्सा. तं. ७

देहेप्रलीयते शोधनंचमयाप्रोक्तंनीलतंत्रादियामले नकस्मैचि
त्प्रकर्तव्यंप्रकाशात्सिद्धिहाभवेत् इतिश्रीगुप्तसाधनतंत्रेपार्व
तीशिवसंवादेसप्तमःपटलः ७ श्रीशिवउवाच अतःपरंप्रव
क्ष्यामिसिद्धारिचक्रमुत्तमं यस्यविज्ञानमात्रेणमंत्रसिद्धिर्भवेद्ध्रु
वं यद्विनापरमेशानिमंत्रसिद्धिर्भवेन्नहि चतुरस्रंलिखेत्कोष्ठं
यावत्षोडशकोष्ठकं तावदेकान्प्रयत्नेनरचयेत्साधकोत्तमः
तत्रवर्णान्लिखेन्मंत्रीप्रकारंशृणुसादरं इंदुत्रिरुद्रनवनेत्रयु
गार्कदिक्स्वरत्रिषोडशचतुर्दशभौतिकेषु पातालपंचदशव
न्हिहिमांशुकोष्ठेवर्णान्लिखेल्लिपिभवान्क्रमशःस्तुधीमान्
सिद्धःसिध्यतिकालेनसाध्यस्तुजपहोमतः सुसिद्धोग्रहणाद्देवि
रिपुर्मूलेनिकृंतति इत्यादिकंफलंदेवीसर्वाम्नायेमयोदितं ना
मात्तुरूपमेतेषांशुभाशुभफलंलभेत् शृणुदेविप्रवक्ष्यामिग।
णनाक्रममुत्तमं नामाद्यक्षरतोदेवियावन्मंत्रादिमाक्षरं कादि
ङांतंखादिचांतंगादिणांतंचतान्विते ङादिखांतंवादिदांतंछा
दिधांतंजनांतिके कादिपांतंसादिफांतंटादिवांतंडभांतिके ञा
दिमांतंढादियांतंणादिरांतंतलांतिके वर्णत्रयंमहेशानिको
ष्ठेपंचदशेप्रिये आदिकोष्ठेचतुर्वर्णान्विलिखेत्साधकोत्तमः
वर्णाष्टकंरहीनात्तुकथितंतवसुव्रते कोष्ठस्थितान्समादाय

गणनामाचरेत्सुधीः नामाद्यत्तरमंत्रं च सिद्धकोष्ठं प्रकीर्तितं
अथातः संप्रवक्ष्यामि पूजाकारं तु सिद्धिदं यं विना परमेशानि
नहि सिद्धिः प्रजायते शालग्रामे मणौ यंत्रे प्रतिमायां सुरेश्वरि
मृत्तिकायां च गंगायां सामान्येन जले तथा अथवा पुष्पयंत्रे
ण पूजयेच्छिवलिंगके यंत्रभेदेन देवेशि फलं सम्यक्प्रजाय
ते शालग्रामे शतगुणं मणौ तद्वत्फलं लभेत् यंत्रे लक्षगुणं
प्रोक्तं प्रतिमायां तथैव च मृत्तिकायां च गंगायां समानफल
मीरितं सामान्ये च जले देवि पूजादिदोषशांतये पुष्पयंत्रे म
हेशानि पूजनात्सर्वसिद्धिभाक् शिवलिंगे महेशानि अनंत
फलमीरितं न कुर्यात्पार्थिवे लिंगे देवी पूजादिकाः क्रियाः
पार्थिवे पूजनाद्देवि सिद्धिहानिः प्रजायते यदि देवान्महेशा
नि मृत्तिका स्खलनं भवेत् तावद्वर्षसहस्राणि नरके पूर्ण
शोभिते कुंभीपाके महाघोरे पच्यते पितृभिः सह अत एव
महेशानि पार्थिवेन हि पूजयेत् स्फाटिकादीन्समानीय लिं
गं निर्माय यत्नतः तल्लिंगे पूजनाद्देवि सर्वसिद्धियुतो भवेत्
इति श्रीरमसायनतंत्रे पार्वतीशिवसंवादे अष्टमः पटलः ८
श्रीशिव उवाच अथातः संप्रवक्ष्यामि यनरो सर्वसिद्धिदं या
मारभ्य महादेवि कुर्वीतायतनं नायकः यत्प्रसादान्महेशानि

रमेच्च त्रिदशेश्वरः तां विद्यां परमेशानि शृणुष्व वरवर्णिनि
दांते विंदुसमाक्रांतं महामाया हरिप्रिये रतिप्रिये ततः पश्चा
द्वह्निजायां ततः प्रिये नवाक्षरो महामंत्रो द्रुतं सिद्धिप्रदायकः
अनया सदृशी विद्या अनया सदृशो जपः अनया सदृशी सिद्धि
र्मे मत्तानेन वर्तते शतवक्त्रो यदि भवेन्नावद्वक्तुं न शक्यते पं
चवक्त्रेण देवेशि किं मया कथ्यतेऽधुना ॐ वैरोस्य ऋषिः श्लोकः
पंक्तिश्छंद उदाहृतं देवता धनदा देवी सर्वसिद्धिप्रदायिनी
धर्मार्थकाममोक्षाश्च चतुर्वर्गफलप्रदाः षड्दीर्घमायया चैव
षडंगन्यासमाचरेत् ध्यानमस्याः प्रवक्ष्यामि येन सिद्धो भवेन्नरः
देवीं कांचनकांतिविमलांबरांशुकाच्छादितां हेमांभोज।
युगाभयांकुशकरीं रत्नोल्लसत्कुंडलीं सर्वाभीष्टफलप्रदां त्रि
नयनां नागेंद्रहारोज्ज्वलां वंदे सर्वभयापहां त्रिजगतां पापा
पहारिणीं परां स्वकीयात्मस्वरूपां तां भावयेच्चित्तरूपिणीं एवं
ध्यात्वा महेशानि मानसैः पूजनं चरेत् अर्घ्यपात्रं स्थापयित्वा
येन्त्रयोनिं प्रदर्शयेत् पीठपूजां ततः कृत्वा ततः पीठमनुं जपेत्
आधारशक्तिमारभ्य यजेत्स्वासनं प्रिये प्रणवादिनमोंतेन।
पूजयेत्पापकारिणीः पुनर्ध्यात्वा महेशानि मूलेनावाहनं चरे
त् षडंगेन च संपूज्य जीवन्यासं समाचरेत् मूलमंत्रं समुच्चार्येन

नोद्धं वाममुच्चरेत् देवायै च ततः पद्मायोगात्मकमंत्रं स्मरेत्
पाद्याद्यैः पूजयेद्देवीं यथाविभवविस्तरैः यंत्रमस्याः प्रवक्ष्यामि
तन्त्रज्ञानामृतमश्नुते नवयोन्यात्मकं चक्रं विलिखेत्कर्णिकोप
रि द्विदलं पद्ममालिख्य मध्ये बीजं समुल्लिखेत् इदं मंत्रं महेशा
नि मातादेव्याः स्वरूपकं लक्ष्मीं पद्मां पद्मालयां श्रियं चैव हरिप्रियां
शार्ङ्गां च कमलां चैव पद्मजां चैव लां तथा लोलां च प्रणवाद्येता
न्नामांतेन प्रपूजयेत् पुनर्मध्ये ततो देवीं पूजयेत्साधकोत्तमः
प्राणायामं ततः कृत्वा यथाशक्ति जपं चरेत् गुह्यादिकं जपफ
लं देव्या हस्ते समर्पयेत् प्राणायामं ततः कृत्वा षडङ्गं समा
चरेत् अथोत्थाय महेशानि विशेषार्घ्यं निवेदयेत् आत्मसम
र्पणं कृत्वा विसृजेद्वै यथेच्छया किंचिन्नैवेद्यं स्वीकृत्य निर्माल्यं
धारयेत्ततः लक्षमेकं जपेन्मंत्रं दशांशं होममाचरेत् तद्दशां
शं तर्पणं च अभिषेकं दशांशकं विप्रभोजनं दशांशं ततः कु
र्यान्महेश्वरि एवं कृत्वा महेशानि साधकः स्याद्गुरुः प्रभुः तस्य
हस्ते महेशानि सर्वसिद्धिर्न संशयः नित्यं नित्यं महेशानि ईश्व
रो यस्तु ते धने लक्ष्मीः सरस्वती चैव निवसेन्मंदिरे सदैव इह।
लोके महेशानि महेन्द्रो जायते ततो मोक्षकांक्षी महेशानि म
हामोक्षमवाप्नुयात् भोगार्थी लभते भोगं यथेच्छं वर्तते चिरात्

ग्रप्र सा॰ने॰ ९

इहलोके सर्वभेकामस्तोयच्छेद्द्वेशः परं मनोराजफले भूयोञ्ज
न्ममाप्नोति साधकः अथातः संप्रवक्ष्यामि धनदास्तोत्रमुत्तमं
यस्योक्तं सर्ववित्तेभ्यः श्रद्दानीनत्यकाशिते नमः सर्वस्वरूपेणान।
मः कल्याणदायिके महासंपत्प्रदे देवि धनदायै नमोस्तु ते १
महाभोगप्रदे देवि महाकामप्रपूरिते सुखमोक्षप्रदे देवी धन
दायै नमोस्तु ते २ ब्रह्मरूपे सदानंदे सदानंदस्वरूपिणि द्रुतसि
द्धिप्रदे देवि धनदायै नमोस्तु ते ३ उद्यत्सूर्यप्रकाशाभे उद्यदा
दित्यमंडले शिवतत्त्वप्रदे देवि धनदायै नमोस्तु ते ४ विष्णुरूपे
विश्वमते विश्वपालनकारिणि महासत्त्वगुणाक्रांते धनदायै
नमोस्तु ते ५ शिवरूपे शिवानंदे कारणानंदविग्रहे विश्वसंहा
ररूपे च धनदायै नमोस्तु ते ६ पंचतत्त्वस्वरूपे च पंचाचाररतेः
ते साधकाभीष्टदे देवि धनदायै नमोस्तु ते ७ इदं स्तोत्रं मया प्रो
क्तं साधकाभीष्टदायकं यः पठेत्पाठयेद्वापि स लभेत्सकलं।
फलं त्रिसंध्यं यः पठेन्नित्यं स्तोत्रमेतत्समाहितः स सिद्धिं लभते
शीघ्रं नात्र कार्या विचारणा इदं रहस्यं परमं स्तोत्रं परमदुर्लभं
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति अप्रकाशमिदं देवि।
गोपनीयं परात्परं अपठत्स्तोत्रमेतद्धि धनवान्जायते चिरात् इ
ति धनदास्तोत्रं श्रीदेव्युवाच धनदाया महाविद्याकथितास

प्रकाशिता इदानीं श्रोतुमिच्छामि कवचं सर्वसूचितं श्रीशिव
उवाच शृणु देवि प्रवक्ष्यामि कवचं मंत्रविग्रहं मातात्सारतरं देवि
कवचं मन्मुखोदितं धनदाकवचस्यास्य कुबेर ऋषिरीरितः पं
क्तिश्छंदो देवता च धनदा सिद्धिदा सदा धर्मार्थकाममोक्षेषु वि
नियोगः प्रकीर्तितः यं बीजं मे शिरः पातु ह्रीं बीजं मे ललाटकं
श्रीं बीजं मे मुखं पातु वकारं हृदि मेवतु तिकारं पातु जठरं प्रि
कारं पृष्ठतोवतु रिकारं जंघयोर्युग्मे स्वाकारं पादयोर्युगे शीर्षा
दिपादपर्यंतं स्वाकारं सर्वतोवतु इत्येतत्कथितं कांते कवचं स
र्वसिद्धिदं गुरुमभ्यर्च्य विधिवत्कवचं प्रपठेद्यदि शतवर्षसह
स्राणां पूजायाः फलमाप्नुयात् गुरुपूजां विना देवि न हि सि
द्धिः प्रजायते गुरुपूजापरो भूत्वा कवचं प्रपठेत्ततः सर्वसिद्धियु
तो भूत्वा विचरेद्भैरवो यथा प्रातःकाले पठेद्यस्तु मंत्रजापपुरः
सरं सोभीष्टफलमाप्नोति सत्यं सत्यं न संशयः पूजाकाले पठेद्य
स्तु देवीं ध्यात्वा हृदंबुजे षण्मासाभ्यंतरे सिद्धिर्नात्र कार्या विचार
णा सायंकाले पठेद्यस्तु स शिवो नात्र संशयः भूर्जे विलिख्य गुटि
कां स्वर्णस्थां धारयेद्यदि पुरुषो दक्षिणे बाहौ योषिद्वामभुजे तथा
सर्वसिद्धियुतो भूत्वा धनवान्पुत्रवान्भवेत् इदं कवचमज्ञात्वा यो भ
जेद्धनदां शुभे स शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात्

७
म.सा.
तं.
१०

20

कवचेनावृतो नित्यं यत्र यत्रैव गच्छति अत एव महादेवि सहस्रशो
नात्र संशयः समानं कवचं देवि किमन्यच्छ्रोतुमिच्छसि श्रीदे
व्युवाच अहो शम्भो महादेव संसारार्णवतारक सर्वेषामयत्नं।
हि शरणागतवत्सल केनोपायेन देवेश शीघ्रं सिद्धो भवेत्ति हि
तत्सर्वं श्रोतुमिच्छामि कथ्यतां परमेश्वर शिव उवाच शृणु मे
त्वसमाहृत्य सत्त्वं परमेश्वरि दिक्सहस्रं जपेद्धि यो न तदा सिद्धिर्न
संशयः अथवा परमेशानि शवमानीय यत्नतः चितास्तिमात्र
(वातेन पातनं हृद्भेदिरे अमावस्यां समारभ्य यावच्छुक्लाष्टमी
भवेत् प्रत्यहं प्रजपेद्धि यो गजान्तकसहस्रकं तदा सिद्धो भवेद्देवि
नान्यथा मम भाषितं यदेतत्कथितं सर्वं तत्र ज्ञानं सुरेश्वरि तत्त्व
ज्ञानं विना देवि न हि सिद्धिः प्रजायते अथवा परयत्नेन केवलं।
शक्तियोगतः सर्वं चतुष्पथे देवि समानीय प्रयत्नतः तस्मिन्दत्वा
स्वयं पीत्वा प्रजपेद्यदि साधकः तदा सिद्धिं लभेद्देवि सत्यं सत्यं न
संशयः यत्र यत्र विनिर्दिष्टं जपकार्यं सुरेश्वरि तत्र तत्र महेशानि
गजान्तकसहस्रकं इति श्रीमातङ्गसाधनतन्त्रे पार्वतीशिवसंवादे।
नवमः पटलः ९ श्रीदेव्युवाच मातङ्गी परमेशानी त्रैलोक्यव
ल्लभा मन्त्ररूपेण देवेश कथयस्व मयि प्रभो श्रीशिव उवाच
शृणु चार्वङ्गि सुभगे मातङ्गीमन्त्रमुत्तमं श्रवणाद्वचसः सुहृदस्य महा

मायासमुद्धरेत् कामबीजं समुद्धृत्य कूर्चबीजं समुद्धरेत् मा
तंगी ह्रेऽनन्तो पश्चात् अस्त्रमंत्रं समुद्धरेत् वह्निजायान्वितो मंत्रः
सर्वतंत्रेषु पूजितः साष्टदशाक्षरी विद्या ब्रह्मादिपरिपूजिता
अस्या विज्ञानमात्रेण पुनर्जन्म न विद्यते कामतुल्यश्च नारीणां
रिपुनाशमनोपमः कुबेर इव वित्ताढ्यो धरण्यां सदृशः क्षमः
विराट्छंदो महेशानि मातंगी देवता स्मृता धर्मार्थकाममोक्षे
षु विनियोगः प्रकीर्तितः ध्यानपूजादिकं सर्वं यामले च प्रोदि
ते तस्याः स्तोत्रं महापुण्यं सावधानावधारय: उद्यदादित्यसं
काशां नयनत्रयभूषितां भक्तानां वरदां देवीं मातंगीं तां नमा
म्यहं १ श्यामवर्णां महादेवीं सर्वालंकारभूषितां द्रुतसिद्धिप्रदां
दिव्यां मातंगीं तां नमाम्यहं २ मुक्ताहारलतावल्यां नानामणि
विराजितां कोटिविद्युत्प्रतीकाशां मातंगीं तां नमाम्यहं ३ वर
दां वरदानाढ्यां वरमालां च धारिणीं दैत्यदानवसंहंत्रीं मातंगीं
तां नमाम्यहं ४ किंकिणीनारहस्ताढ्यां कोटिदेशसुशोभनां प
द्मवस्त्रपरीधानां मातंगीं तां नमाम्यहं ५ सौदामिनीसमाभासां
नानालंकारसंयुतां इंद्रादिदेवतासेव्यां मातंगीं तां नमाम्यहं ६
मुद्रिकांकनसंयुक्तां चरणांगुलिराजितां माणिक्यरत्नसंयुक्तां
मातंगीं तां नमाम्यहं ७ दिग्व्रलोदशावंद्यासास्त्रधावर्षणकारि

गुप्त
सा॰ तं॰
११

ऐं ॐ देवं दृंदसमायुक्तां मातंगीं तां नमाम्यहं ८ इदं स्तोत्रं मया प्रो
क्तं साधकाभीष्टदायकं त्रिसंध्यं यः पठेन्नित्यं तस्य सिद्धिर्हि रहतः
पूजाकाले सकृद्वापि यः पठेत्स्तोत्रमुत्तमं नं स्ववित्तं विलोकेव
कुवेरोपि तिरस्कृतः यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन
प्रकाशात्सिद्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत् स्तोत्रं समाप्तं दे
व्युवाच कवचं शृणु वल्लभे श्रीदेव्युवाच देवदेव जगन्नाथ जगत्त्रि
स्तारकारकः मातंगीकवचं नाथ श्रोतुमिच्छामि सांप्रतं यां स
माराध्य देवेश धनेशो यक्षनायकः यामाराध्य महादेव वासवो
स्त्रिदशेश्वरः ब्रह्मविष्णुमहारुद्राः समाराध्य महेश्वरी सृष्टिस्थि
तिलयादेवी कर्तारो जगदीश्वराः तस्यास्तु कवचं दिव्यं कथय
स्व कृपया श्रीशिव उवाच शृणु देवि प्रवक्ष्यामि मातंगीकव
चं शुभे न वक्तव्यं महादेवि मातंगी ब्रह्मरूपकं त्रैलोक्यरक्षण
स्यास्य दक्षिणामूर्तिः संज्ञकः ऋषिश्छंदो विराट् देवि मातंगी देव
ता स्मृता धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॐ बीजं मे
शिरः पातु ह्रीं बीजं मे ललाटकं क्लीं बीजं चक्षुषोः पातु नासायां प
रिरक्षतु माकारं वदने पातु तकारं कंठमेव तु सैंकारं स्कंददेशश्च ग्ये
फकारं बाहुयुग्मके टकारं हृदयं पातु स्वाकारं नननयुग्मके पृष्ठदे
शं तथा नाभि जठरे लिंगदेशके पादद्वंद्वं च सर्वांगं हाकारं परिर

तत्र मांषोडशाक्षरीविद्यासर्वांगंपरिरक्षतु इंद्रोमांपातुऐंद्रेवह्नि
कोणेनलोवतु यमोमांदक्षिणेपातुनैर्ऋत्यांनैर्ऋतिश्चमां पश्चिमे
वरुणःपातुवायव्यांपवनोवतु ऊर्ध्वंब्रह्मासदापातुअधश्चानंतप्
वच रक्षाहीनंतुयत्स्थानंवर्जितंकवचेनतु तत्सर्वंरक्षमेदेविमातं
गिसर्वसिद्धिदे इतितेकथितंदेविकवचंपरमाद्भुतं त्रिसंध्यंयःप
ठेन्नित्यंसमाप्ताद्धंकृतःस्वयं शुध्यांजलाष्टकेरत्वा मूलेनैवपठेत्स
कृत् शतवर्षसहस्राणांमरूजायाःफलमाप्नुयात् भूर्जेविलिख्यगु
लिकांस्वर्णस्थांधारयेद्यदि सर्वसिद्धियुतःसोपिसर्वसिद्धिमयोज
नः ब्रह्मास्त्रादीनिशस्त्राणितत्कंठेप्राप्यपावेति मासानिकृत्स्नमा
स्रेवभवंत्येवनसंशयः नदेयंपरशिष्येभ्यःअभक्तेभ्योविशेषतः
देयंशिष्यायशांतायचान्यथापतनंभवेत् प्रातःकालेपठेद्यस्तुगु
रुपूजापुरःसरं तस्यसर्वार्थसिद्धिःस्यात्सशिवोनात्रसंशयः मध्या
ह्नेयःपठेद्यस्तुगुरुपूजापुरःसरं कुबेरइववित्ताढ्योजायतेमदनो
पमः सायंकालेपठेद्यस्तुध्यात्वादेवींहृदंबुजे सर्वसिद्धियुतोभू।
त्वाविचरेदीश्वरोयथा गुरुपूजायुतोभक्त्याकवचंयःपठेद्यदि लक्ष्मीः
सरस्वतीतस्यनिवसेन्मंदिरेमुखे इदंकवचमज्ञात्वामातंगीयदि
वाजपेत् इहलोकेदरिद्रःस्यात्परत्रेश्वकारतांव्रजेत् ममाभेकवचं
देविशृणुमंत्राणवल्लभे षट्सहस्रंजपेन्मंत्रंदशांशंहोमयेत्सुधीः

१ म.सा. तं. १२

अत्राहुतैर्भवेत्काष्ठैर्होमात्सर्वसमृद्धिदः तर्पणं चाभिषेकं च दशांशा
शमाचरेत्सुधीः तद्दशांशं महेशानि कुर्याद्ब्राह्मणभोजनं ततः सि
द्धो भवेन्मंत्री नान्यथा मम भाषितं सकृत्कृते परेशानि यदि सिद्धि
र्न जायते पुनस्तेनैव कर्तव्यं ततः सिद्धो भवेद्ध्रुवं इति श्रीगुप्तसा
धनतंत्रे पार्वतीशिवसंवादे दशमः पटलः १० श्रीदेव्युवाच वि
श्वकर्ता विश्वहर्ता विश्वसंहारपालकः त्वां विना संशयच्छेत्ता ना
स्ति नाथ कुत्रचित् वैष्णवे च शैवे च शाक्ते सौरे गाणपे च स
र्वत्र विहितां मालां वद मे परमेश्वर ईश्वर उवाच अक्षमालां महेशा
नि पंचाशद्वर्णरूपिणीं अकारादि महेशानि क्षकारांतां यतः प्रि
ये अक्षमाला समाख्याता सर्वतंत्रप्रशंसिता अस्या जपनमात्रेण
महामोक्षमवाप्नुयात् श्रीदेव्युवाच योगमालाजपाद्देव सर्वयो
गेश्वर प्रभो देहमध्यस्थितां मालां पंचाशद्वर्णरूपिणीं तां विहाय
महादेव अस्थिमालाजपः कथं ईरितस्त्वया यच्चास्थि तद्देवाक
र्थं विभो यस्य छायादिसंस्पर्शाद्देव विनीयते प्रमान् तस्यास्थि
समानीय सर्वांगे भूषणं कथं श्रीशिव उवाच शक्तिं च मंत्रसत्वं च
ब्राह्मणादीन्महेश्वरि वर्जयित्वा प्रयत्नेन शृणुष्व मत्प्राणवल्लभे कुर्या
त्कोवं तथा मालां शुद्धं श्मशानमेव च प्रणवं निष्कलं साक्षाद्ब्रह्मवि
ष्णुशिवात्मकं प्रणवं प्रजपेद्यस्तु समस्तादिस्वरूपष्टक गंका

शात्सर्ववर्णानिजायंतेनात्रसंशयः ॐकारंत्रिगुणंदेवित्रिगुणात्मनी
नेत्वनिष्कले गुरुवक्त्रान्महामंत्रंशाम्भोतिवैवमानवः सर्ववर्णा
महेशानिलीयंतेप्रणवेप्रिये अतएवमहेशानिप्रणवोब्रह्मरू
पकः स्त्रीशूद्रयोःपरेशानिप्रणवेनाधिकारिता तज्ज्ञातश्चैववा
ग्लः सर्वमंत्रविवर्जितः मंत्रहीनेनत्रय्यादिसर्ववर्णाविभूषिते
अकारादिक्षकारांतामस्थिमध्येस्थितासदा निलार्द्धवास्थिमा।
ध्येवंपंचाशद्वर्णरूपिणी अतएवबहिश्चक्रेग्रीवायांचतथाकरे
सर्वगात्रेपरेशानिमहाशंखविभूषितः महाशंखाख्यमालायां
योजयेत्साधकोत्तमः अणिमादिविभूतीनामीश्वरोभावसंशयः
सर्ववर्णमयीमालासर्वदेवेषुयोजिता वर्णहीनेनास्तिमंत्रक।
दाचिदपिपार्वति महाशंखंमहेशानिसर्ववर्णाविभूषिते अतए
वमहाशंखंसर्वतंत्रेषुयोजितं यदिभाग्यवशाद्देविमहाशंखंच
लभ्यते ससिद्धःसगणःसोपिसचविस्तर्नसंशयः तदेवमहसा
सिद्धिनात्रकार्याविचारणा गोपञ्चमहेशीऊर्यादथवासर्पत्रपि
णी स्थूलासूक्ष्माचपर्यंतंक्रमेणग्रंथनंचरेत् स्थूलेनग्रंथनंकार्यंप्र
णवेनाथवाप्रिये अस्त्रग्रंथिंप्रयत्नेनदद्यात्साधकसत्तमः स्थूलद
यंपरेशानिमिलितंकारयेत्ततः मेरुंचपरतःकार्यंतत्रदेवग्रंथि
संयुतं समीपेशक्रदेवस्यसंस्कारमाचरेत्सुधीः स्थूलावधिजपेन्म

ग
म.सा.
तं.
११

13

द्रेस्तत्रभागेसमापयेत् पञ्चावधिजपादेवि सिद्धिहानिः प्रजाय
ते शिरोध्यानाज्जपेन्मालां शेषोध्यानपुरःसरं संभाव्यमालांभुंजेो
नत्संसाकथाप्रसंगेनश्वप्रदासात् जपेन्मदांगेलभतेतवांगप्र
दीप्यकान्तायनिकामनादं इति श्रीरुद्रयामलतन्त्रे पार्वतीशिव
संवादेएकादशः पटलः ११ श्रीपार्वत्युवाच देवदेवमहादेवसं
सारार्णवतारक वेदमातेति विख्याता गायत्री च कथं भवेत् श्री
शिवउवाच शृणु देवि प्रवक्ष्यामि गायत्री परमाक्षरी वेदमातेति
विख्याता सर्वतंत्रप्रपूजिता हालाहलं समुद्धृत्य नाम्नावरमुद्धरे
त् वामकर्णयुतं कृत्वा उत्तनीभिं समुद्धरेत् कर्णयुक्तं भृगुं शिरेफे
ततश्च सर्वं विदित्वा वारुणेणारुमनोयुक्तं बहुवीजेन ततः परं नोतश्च
केसरियुक्तं चैवं व्याहृतिं समुद्धरेत् नमंदेवसमुद्धृत्य सवितस्तद
नंतरं वरेण्यमिति वोच्चार्य भर्गो देवस्य धीमहि धियो यो नः प्रचो
दयात् पुनर्वतदनंतरं इति जप्त्वा महेशानि साक्षान्नारायणो भवे
त् धियो यो मध्यभागे च ह्रकारद्वयमेव च अतएव महादेवि प्रथमे
न श्रुतिरेव च इति जप्त्वा महेशानि मुक्तो भवति तत्क्षणात् अंत्य
यकारयोः स्थाने योकार इति यः पठेत् सर्वोऽशुल इति विख्यातां ब्रह्म
हत्या दिने दिने अतएव महेशानि तवस्नेहात्प्रकाशितं दशभि
र्जन्मजनितं पापेनैव शुक्रकृतं त्रियुगं तत्सहस्रेण गायत्री हंति।

पातकं लभते जन्मान्तरं तां देवीं गायत्रीं परमातरीं सर्वसिद्धीश्वरीं भू
त्वा देववद्विहरेत्त्रिलो यन्नूहे विधते देवि पतनं तंत्रं स्तवामयं न
न्नूहं परमेशानि कैलासमहं शंसदा नित्यं च पठ जयेन्तंत्रं स सिद्धो
नात्र संशयः नित्यं नित्यं महेशानि यः स्पृशेत्तंत्रमुत्तमं स पूतः स
र्वपापेभ्यः प्रान्ते शिवमयो भवेत् यो लिखति त्विमां तंत्रं शिववाक्यं
स्तवामृतं गंगास्नानसमं पुण्यं प्रान्ते शिवमवाप्नुयात् यो यत्र पठ
ते नित्यं तंत्रराजमिदं शुभं स सर्वेडक्कृतिंनीतौ प्रान्ते देवि पदं व्रजे
त् इति श्रीरमसायने नाम महातंत्रराजे पार्वतीशिवसंवा
दे द्वादशः पटलः १२ समाप्तः ॥